# Shri Janamangala Stotram

# શ્રીજનમઙ્ગલસ્તોત્રમ્

## Document Information

Text title : Shri Janamangala Stotram

File name : janamangalastotram.itx

Category : deities_misc, svAminArAyaNa, gurudev, mangala, stotra

Location : doc_deities_misc

Author : shatAnandamuni

Description/comments : See corresponding nAmAvalI

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

Shri Janamangala Stotram

# શ્રીજનમઙ્ગલસ્તોત્રમ્

શ્રી હરયે નમઃ ।
નમોનમઃ શ્રીહરયે બુદ્ધિદાય દયાવતે ।
ભક્તિધર્માઙ્ગજાતાય ભક્તકલ્પદ્રુમાય ચ ॥ ૧॥

સુગન્ધપુષ્પહારાદ્યૈર્વિવિધૈરુપહારકૈઃ ।
સમ્પૂજિતાય ભક્તૌઘૈઃ સિતામ્બરધરાય ચ ॥ ૨॥

નામ્નામષ્ટોત્તરશતં ચતુર્વર્ગમભીપ્સતામ્ ।
સદ્યઃ ફલપ્રદં નૃણાં તસ્ય વક્ષ્યામિ સત્પતેઃ ॥ ૩॥

અસ્ય શ્રીજનમઙ્ગલાખ્યસ્ય શ્રીહર્યષ્ટોત્તરશત-
નામસ્તોત્રમન્ત્રસ્ય શતાનન્દ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ ।
ધર્મનન્દનઃ શ્રીહરિર્દેવતા । ધાર્મિક ઇતિ
બીજમ્ । બૃહદ્વ્રતધર ઇતિ શક્તિઃ । ભક્તિનન્દન
ઇતિ કીલકમ્ । ચતુર્વર્ગસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
અથ ધ્યાનમ્ ।
વર્ણિવેષરમણીયદર્શનં મન્દહાસરુચિરાનનામ્બુજમ્ ।
પૂજિતં સુરનરોત્તમૈર્મુદા ધર્મનન્દનમહં વિચિન્તયે ॥ ૪॥

શ્રીકૃષ્ણઃ શ્રીવાસુદેવો નરનારાયણઃ પ્રભુઃ ।
ભક્તિધર્માત્મજોજન્મા કૃષ્ણો નારાયણો હરિઃ ॥ ૫॥

હરિકૃષ્ણો ઘનશ્યામો ધાર્મિકો ભક્તિનન્દનઃ ।
બૃહદ્વ્રતધરઃ શુદ્ધો રાધાકૃષ્ણેષ્ટદૈવતઃ ॥ ૬॥

મરુત્સુતપ્રિયઃ કાલીભૈરવાદ્યતિભીષણઃ ।
જિતેન્દ્રિયો જિતાહારસ્તીવ્રવૈરાગ્ય આસ્તિકઃ ॥ ૭॥

યોગેશ્વરો યોગકલાપ્રવૃત્તિરતિધૈર્યવાન્ ।

જ્ઞાની પરમહંસશ્ચ તીર્થકૃત્તૈર્થિકાર્ચિતઃ ॥ ૮॥

ક્ષમાનિધિઃ સદોન્નિદ્રો ધ્યાનનિષ્ઠસ્તપઃ પ્રિયઃ ।
સિદ્ધેશ્વરઃ સ્વતન્ત્રશ્ચ બ્રહ્મવિદ્યાપ્રવર્તકઃ ॥ ૯॥

પાષણ્ડોચ્છેદનપટુઃ સ્વસ્વરૂપાચલસ્થિતિઃ ।
પ્રશાન્તમૂર્તિર્નિર્દોષોઽસુરગુર્વાદિમોહનઃ ॥ ૧૦॥

અતિકારુણ્યનયન ઉદ્ધવાધ્વપ્રવર્તકઃ ।
મહાવ્રતઃ સાધુશીલઃ સાધુવિપ્રપ્રપૂજકઃ ॥ ૧૧॥

અહિંસયજ્ઞપ્રસ્તોતા સાકારબ્રહ્મવર્ણનઃ ।
સ્વામિનારાયણઃ સ્વામી કાલદોષનિવારકઃ ॥ ૧૨॥

સચ્છાસ્ત્રવ્યસનઃ સદ્યઃસમાધિસ્થિતિકારકઃ ।
કૃષ્ણાર્ચાસ્થાપનકરઃ કૌલદ્વિટ્ કલિતારકઃ ॥ ૧૩॥

પ્રકાશરૂપો નિર્દમ્ભઃ સર્વજીવહિતાવહઃ ।
ભક્તિસમ્પોષકો વાગ્મી ચતુર્વર્ગફલપ્રદઃ ॥ ૧૪॥

નિર્મત્સરો ભક્તવર્મા બુદ્ધિદાતાઽતિપાવનઃ ।
અબુદ્ધિહૃદ્બ્રહ્મધામદર્શકશ્ચાપરાજિતઃ ॥ ૧૫॥

આસમુદ્રાન્ત સત્કીર્તિઃ શ્રિતસંસૃતિમોચનઃ ।
ઉદારઃ સહજાનન્દઃ સાધ્વીધર્મપ્રવર્તકઃ ॥ ૧૬॥

કન્દર્પદર્પદલનો વૈષ્ણવક્રતુકારકઃ ।
પઞ્ચાયતનસમ્માનો નૈષ્ઠિકવ્રતપોષકઃ ॥ ૧૭॥

પ્રગલ્ભો નિઃસ્પૃહઃ સત્યપ્રતિજ્ઞો ભક્તવત્સલઃ ।
અરોષણો દીર્ઘદર્શી ષડૂર્મિવિજયક્ષમઃ ॥ ૧૮॥

નિરહઙ્કૃતિરદ્રોહ ઋજુઃ સર્વોપકારકઃ ।
નિયામકશ્ચોપશમસ્થિતિર્વિનયવાન્ ગુરુઃ ॥ ૧૯॥

અજાતવૈરી નિર્લોભો મહાપુરુષ આત્મદઃ ।
અખણ્ડિતાર્ષમર્યાદો વ્યાસસિદ્ધાન્તબોધકઃ ॥ ૨૦॥

મનોનિગ્રહયુક્તિજ્ઞો યમદૂતવિમોચકઃ ।
પૂર્ણકામઃ સત્યવાદી ગુણગ્રાહી ગતસ્મયઃ ॥ ૨૧॥

સદાચારપ્રિયતરઃ પુણ્યશ્રવણકીર્તનઃ ।
સર્વમઙ્ગલસદ્રૂપનાનાગુણવિચેષ્ટિતઃ ॥ ૨૨॥

ઇત્યેતત્પરમં સ્તોત્રં જનમઙ્ગલસંજ્ઞિતમ્ ।
યઃ પઠેત્તેન પઠિતં ભવેદ્વૈ સર્વમઙ્ગલમ્ ॥ ૨૩॥

યઃ પઠેચ્છૃણુયાદ્ભક્ત્યા ત્રિકાલં શ્રાવયેચ્ચ વા ।
એતત્તસ્ય તુ પાપાનિ નશ્યેયુઃ કિલ સર્વશઃ ॥ ૨૪॥

એતત્સંસેવમાનાનાં પુરુષાર્થચતુષ્ટયે ।
દુર્લભં નાસ્તિ કિમપિ હરિકૃષ્ણપ્રસાદતઃ ॥ ૨૫॥

ભૂતપ્રેતપિશાચાનાં ડાકિનીબ્રહ્મરાક્ષસામ્ ।
યોગિનીનાં તથા બાલગ્રહાદીનામુપદ્રવઃ ॥ ૨૬॥

અભિચારો રિપુકૃતો રોગશ્ચાન્યોઽપ્યુપદ્રવઃ ।
અયુતાવર્તનાદસ્ય નશ્યત્યેવ ન સંશયઃ ॥ ૨૭॥

દશાવૃત્યા પ્રતિદિનમસ્યાભીષ્ટં સુખં ભવેત્ ।
ગૃહિભિસ્ત્યાગિભિશ્ચાપિ પઠનીયમિદં તતઃ ॥ ૨૮॥

ઇતિ શ્રીશતાનન્દમુનિવિરચિતં શ્રીજનમઙ્ગલાખ્યં
શ્રીહર્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

શ્રીજનમઙ્ગલસ્તોત્રમ્

*Shri Janamangala Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*